শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী মুক্কূর্ লক্ষ্মীনৃসিংহস্বামিনা অনুগৃহীতং

# ॥ শ্রী মট্ট্রপল্লিমঙ্গলাষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী মট্টপল্লিমঙ্গলাষ্টকম্ ॥

মট্টপল্লিনিৱাসায মধুরানন্দরূপিণে।
মহাযজ্ঞস্বরূপায শ্রীনৃসিংহায মঙ্গলম্॥ **1** ॥

কৃষ্ণৱেণীতটস্থায সর্ৱাভীষ্টপ্রদাযিনে।
প্রহ্লাদপ্রিযরূপায শ্রীনৃসিংহায মঙ্গলম্॥ **2** ॥

গর্তস্থিতায ধীরায গম্ভীরায মহাত্মনে।
সর্ৱারিষ্ট ৱিনাশায শ্রীনৃসিংহায মঙ্গলম্॥ **3** ॥

ঋগ্যজুস্সামরূপায মন্ত্রারূঢায ধীমতে।
শ্রিতানাং কল্পৱৃক্ষায শ্রীনৃসিংহায মঙ্গলম্॥ **4** ॥

গুহাশযায গুহ্যায গুহ্যৱিদ্যাস্বরূপিণে।
কুহরান্তে ৱিহারায শ্রীনৃসিংহায মঙ্গলম্॥ **5** ॥

শ্রীপল্যদ্রিমধ্যস্থায নিধযে মধুরায চ।
সুখপ্রদায দেৱায শ্রীনৃসিংহায মঙ্গলম্॥ **6** ॥

তাপনীযরহস্যায তাপত্রয ৱিনাশিনে।
নতানাং পারিজাতায শ্রীনৃসিংহায মঙ্গলম্॥ **7** ॥

রাজ্যলক্ষ্ম্যা সমেতায রাগদ্বেষ ৱিনাশিনে।
মট্টপল্লি নিৱাসায শ্রীনৃসিংহায মঙ্গলম্॥ **8** ॥

মুক্তূর্ নৃসিংহদাসেন প্রোক্তং মঙ্গলমদ্ভুতম্।
যঃ পঠেৎ শ্রদ্ধযা ভক্ত্যা সর্ৱপাপৈঃ প্রমুচ্যতে॥ 9॥

॥ শ্রী মট্টপল্লিমঙ্গলাষ্টকং সমাপ্তম্॥